Reg. No. : ......................................

Name : ..........................................

# SY-510

**SECOND YEAR HIGHER SECONDARY EXAMINATION, MARCH 2023**

Part – II

**SANSKRIT**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

***निर्देशा :***

- 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

***നിർദ്ദേശങ്ങൾ:***

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**1-8 प्रश्नानाम् उत्तराणि कोष्ठकात् चित्वा लिखत । प्रत्येकं एकैकः अङ्कः ।**

**1 മുതൽ 8 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും തെരഞ്ഞെടുത്ത് എഴുതുക ഓരോ സ്കോർ വീതം.** **(8 × 1 = 8)**

1. गीते चन्दनम् इत्यर्थे प्रयुक्तं पदं किम् ?

   (मलिनम्, मलयजम्, किसलयम्)

2. "तात ! प्रकोष्ठे तस्मिन् महदुष्णं वर्तते" – कस्य वचनमिदम् ?

   (बालकस्य, शारिकायाः, राधायाः)

3. महाभारतस्य कर्ता कः ?

   (वाल्मीकिः, व्यासः. कालिदासः)

4. यशोधरा कस्य भार्या भवति ?

   (सिद्धार्थस्य, छन्दस्य, येशुदेवस्य)

5. 'कुमारश्चिन्तयामास भाविशिष्यगणं निजम्' – कुमारः कः ?

   (येशुदेवः, श्रीबुद्धः, जोसफ्)

6. 'भो विष्णुगुप्तः कुतः सन्देहः" – विष्णुगुप्तः कः ?

   (राक्षसः, नन्दः, चाणक्यः)

7. भगवद्गीतायां कयोः मिथः भाषणम् उपवर्णितम् ?

   (अर्जुनभीमयोः, कृष्णार्जुनयोः, कृष्णनकुलयोः)

8. योगशास्त्रे कति अङ्गानि सन्ति ?

   (षट्, सप्त, अष्ट)

**9-11 प्रश्नेषु प्रश्नद्वयोः उत्तरम् उदाहरणानुसारं लिखत । प्रत्येकं द्वौ अङ्कौ ।**

**9 മുതൽ 11 വരെ ഉള്ള ചോദ്യങ്ങളുടെ ഉത്തരം ഉദാഹരണമനുസരിച്ചെഴുതുക ഓരോ വിഭാഗത്തിനും 2 സ്കോർ വീതം.** **(2 × 2 = 4)**

9. उदाहरणानुसारं पदच्छेदं लिखत ।

**उदा :** भूमिरिति → भूमिः **+** इति

(क) कविरिति → ________ + ________ ।

(ख) हरिरिति → ________ + ________ ।

10. उदाहरणानुसारं सन्धत्त ।

**उदा :** इति → अयम् = इत्ययम् ।

(क) इति **+** अपि = ____________ ।

(ख) इति **+** अत्र = ____________ ।

11. उदाहरणानुसारं वाक्यद्वयं परिवर्तयत ।

**उदा :** देवालयं गच्छति । ईश्वरं वन्दते ।

देवालयं गत्वा ईश्वरं वन्दते ।

(क) विद्यालयं गच्छति । पाठं पठति ।

________________________ ।

(ख) घण्डानादं श्रुणोति । कक्ष्याम् आगच्छति ।

_____________________________ ।

**12-15 प्रश्नेषु त्रयाणाम् उत्तराणि निर्देशानुसारं लिखत । प्रत्येकस्य त्रयोऽङ्कः ।**

**12 മുതൽ 15 വരെ ചോദ്യങ്ങളിൽ നിന്നും മൂന്ന് എണ്ണത്തിന് ഉത്തരം എഴുതുക. ഓരോ വിഭാഗത്തിനും 3 സ്കോർ വീതം.** **(3 × 3 = 9)**

12. अधः प्रदत्तं गद्यभागं पठित्वा–क्त्वान्त–ल्यबन्त–तुमुन्नन्त पदानि चित्वा लिखत ।

मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्य तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हर्तोऽस्मि' इति रुदितमश्रौषम् ।

| **क्त्वान्तम्** | **ल्यबन्तम्** | **तुमुन्नन्तम्** |
|---|---|---|
| ____________ | ____________ | ____________ |

13. आशयेन सह पद्यं योजयत ।

| | |
|---|---|
| आत्मैव आत्मनः रिपुः । | देवान् भावयतानेन ते देवा भावयन्तु वः ।<br>परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।। |
| परस्परभावना एव श्रेयस्करः । | क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।<br>स्मृति भ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।। |
| क्रोधात् सर्वनाशोऽभिजायते । | उद्धरेदात्मनाऽत्मानं नाऽऽत्मानवसादयेत् ।<br>आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।। |

14. संस्कृतभाषयानुवदत ।

(i) പാണിനി സംസ്കൃത വ്യാകരണത്തിന്റെ ആചാര്യനാണ്.

(Panini is the Acharya of Sanskrit Grammar.)

(ii) കേരളത്തിന്റെ തലസ്ഥാനം തിരുവനന്തപുരമാണ്.

(Thiruvananthapuram is the capital of Kerala.)

(iii) ജീവിത വിജയത്തിന് മനോനിയന്ത്രണം അനിവാര്യമാണ്.

(Mind control is essential for life success.)

15. अधः प्रदत्तं गद्यभागं पठित्वा अधो रेखाङ्कितपदानां स्थाने समानार्थकपदानि पेटिकातः चित्वा गद्यभागं पुनर्लिखत ।

अमुं वृत्तान्तं विज्ञाय जनाः आश्रमं समागतः । तदानीम् अनन्तपुरीतः आश्रमम् आगतः गुरुदेवः इमां वार्तां निशम्य खिन्नमानसोऽभवत् ।।

| | | |
|---|---|---|
| दुःख, | श्रुत्वा, | संभवं |

DITTO WS

**16-18 प्रश्नानाम् उत्तराणि लिखत । प्रत्येकं चत्वारि अङ्काः ।**

**16 മുതൽ 18 വരെ ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതുക. 4 സ്കോർ വീതം.** **(3 × 4 = 12)**

16. अधः प्रदत्तान् सम्भाषणांशान् पूरयत ।

(द्वौ आचार्यौ मिलतः तयोः सम्भाषणमत्र दत्तम्)

रतीषः – अये ! रघो _________ ।

रघुः – नमस्ते । अपि कुशली ?

रतीषः – _________ ।

रघुः – विशेषः अस्ति । अस्मिन् सप्ताहे कूटियाट्टम् भविष्यति

रतीषः – _________ ?

रघुः – मार्ग्याम् कूटियाट्टसप्ताहः प्रचलन्नस्ति ।

रतीषः – _________ ?

रघुः – आम् ! गृहे सर्वे: सुखिनः ।

17. अधः प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।

मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः ।

कुमारश्चिन्तयामास भाविशिष्यगणं निजम् ।।

मेषपालैः _________ मेषयूथं _________ स

_________ निजं _________ चिन्तयामास ।।

18. गद्यभागं पठित्वा चत्वारः प्रश्नाः लिखत ।

अरुविप्पुरम् जनपदे श्रीनारायणगुरुणा स्थापितः एकः मठः आसीत् । मठस्य समीपे एकं कदलीवनम् अवर्तत । एकदा एकः चोरः कदलीफलगुञ्चम् एकं मुषित्वा अगच्छत् ।।

| | | | | | |
|---|---|---|---|---|---|
| कः | किम् | केन | कुत्र | कथं | कदा |

DITTO WS

**19-22 प्रश्नेषु त्रयाणाम् उत्तराणि निर्देशानुसारं लिखत । प्रत्येकं पञ्च अङ्काः ।**

**19 മുതൽ 22 വരെ ചോദ്യങ്ങളിൽ നിന്നും മൂന്ന് എണ്ണത്തിന് ഉത്തരം എഴുതുക. 5 സ്കോർ വീതം.** **(3 × 5 = 15)**

19. प्रस्तुताप्रस्तुतानि योजयत ।

| प्रस्तुतानि | अप्रस्तुतानि । |
|---|---|
| आवासः | हरिणी |
| राधा | विषम् |
| मलयजपङ्कम् | जालायते |
| कन्दर्पः | विपिनम् । |
| प्रियसखीमाला | यमायते । |

20. यथोचितं योजयत ।

| क | ख |
|---|---|
| आषामेनोन् | महाप्रस्थानम् । |
| जयदेवः | हिमालयप्रत्यक्षङ्ङल् |
| माटम्प् कुञ्जुक्कुट्टन् | दर्शनमाला । |
| पि.सि. देवस्या | गीतगोविन्दम् |
| श्रीनारायणगुरुः | क्रिस्तुभागवतम् |

21. अधः प्रदत्तं पद्यं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः ।
अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः ।।

(1) बालकः केन समं अवर्धत ?

(2) बालकः कथं अवर्धत ?

(3) पद्यस्याशयं स्ववाक्यैः लिखत ।

22. अधः प्रदत्तस्य गद्यभागस्याशयं मलयालभाषया आङ्गलभाषया वा अनुवदत ।

आत्मनाथवियोगात् व्रणितात्मा यशोधरा भूतकालस्मृतिषु व्यापृता अभवत् । तत्र भवान् छन्देन सहैव जनपदं द्रष्टुं प्रातिष्ठत । सायं प्रत्यागतः उद्यानस्य विल्ववेदिकायां तूष्णीमुपाविशत् । तन्नेत्रे अर्धनिमीलिते आस्ताम् । किं जातम् उच्यताम् । यशोधरे ! अद्याहं लोकमपश्यम् ।

**23-27 प्रश्नेषु चतुर्णाम् उत्तराणि निर्देशानुसारं लिखत । प्रत्येकं षट् अङ्काः ।**

**23 മുതൽ 27 വരെ ചോദ്യങ്ങളിൽ നിന്നും 4 എണ്ണത്തിന് നിർദേശാനുസാരം ഉത്തരം എഴുതുക. 6 സ്കോർ വീതം.** **(4 × 6 = 24)**

23. कथास्तम्भं 'व्रजहरितम्' इति पाठभागानुसारं क्रमीकुरुत ।
    - तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ।
    - विषलिप्तः वृक्षः क्रमेण शुष्कः अभवत् ।
    - शारिका पुरतः तापसीम् अपश्यत् ।
    - वृक्षम् अनादृत्य गन्तुं सा न समर्था ।
    - वृक्षः पल्लवितः पत्रैः शाखाभिः संपुष्टः अभवत् ।
    - विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः बिद्धः ।

24. गद्यांशं पठित्वा एकां पटकथां लिखत ।

    श्रीनारायणगुरुणा स्थापितः एकः मठः अरुविप्पुरं देशे अस्ति । तस्य मठस्य समीपे एकं कदलीवनमवर्तत । एकदा क्षुधार्तः एकः कदलीफलगुञ्जम् एकं मुषित्वा अगच्छत् । तत्रस्थैः अन्तेवासिभिः गृहीतोऽयं चोरः आरक्षिजनसमक्षं नीतः । मठस्य धनमपहृतमिति ज्ञात्वा न्यायाधीशः एकाधिकं शतं ताडनं तस्य दण्डरूपेण अघोषयत् ।

25. प्रदत्तां सूचनां पठित्वा संस्कृतस्य प्राधान्यमधिकृत्य एकं लघूपन्यासं लिखत ।

    **सूचना :**
    - सुभाषितानि ।
    - इतिहास – पुराणानि ।
    - संस्कृतसाहित्यम् ।
    - संस्कृतव्याकरणं दर्शनानि च ।

26. अधः प्रदत्तं गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

    आस्तिकदर्शनेषु अन्यतमं भवति योगदर्शनम् । अस्य दर्शनस्य आधारं भवति योगसूत्रम् । पतञ्जलि महर्षिः अस्य प्रणेता । आधुनिककाले विवेकानन्दस्वामिनः अक्षीणपरिश्रमेण अस्य प्रचुर प्रचारमलभत । योगसूत्रे समाधिपादः साधनपादः विभूतिपादः कैवल्यपादः चेति चत्वारः पादाः सन्ति । योगश्चित्तवृत्ति निरोधः इति प्रसिद्धा उक्तिः अस्मिन्नस्ति ।

    (1) 'अस्मिन्नस्ति' इति पदस्य पदच्छेदं लिखत ।
    (2) योगमधिकृत्य प्रसिद्धा उक्तिः का ?
    (3) योगसूत्रे कति पादाः सन्ति ?
    (4) कस्य अक्षीणपरिश्रमेण योगदर्शनस्य प्रचुरप्रचारमलभत ?
    (5) योगदर्शनस्य आधारः किं भवति ?
    (6) योगसूत्रस्य प्रणेता कः ?

27. प्रदत्तं गद्यभागं पठित्वा 'संगृह्य' लिखत ।

संस्कृतसाहित्ये काव्यं दृश्य श्रव्यभेदेन द्विविधौ स्तः । दृश्यकाव्ये रूपकाणि, चलच्चित्राणि, परम्पराः चान्तर्भवन्ति । तत्र रूपकाणि दशप्रकाराणि सन्ति । तेषु प्रसिद्धतमं नाटकं भवति मुद्राराक्षसम् । मुद्रया गृहीतः राक्षसः मुद्राराक्षसः । तम् अधिकृत्य कृतं नाटकं मुद्राराक्षसम् ।

मुद्राराक्षसस्य कर्ता भवति विशाखदत्तः । गूढनीतिः राजनीतिश्चाधिकृत्य एव अस्य नाटकस्य रचना । अन्नसत्रात् कुसुमपुराधिपेन नन्दराजेन कृतं विष्णुगुप्तनिष्कासनं, विष्णुगुप्तः चन्द्रगुप्तमुपयुज्य कृतं नन्दवंशोन्मूलनं चास्य नाटकस्य इतिवृत्तम् ।

वीररसप्रधानेऽस्मिन् नाटके सप्त अङ्काः सन्ति । शृङ्गाररसस्याधिक्यं विदूषकफलितं च अस्मिन् नाटके नास्ति । कथा कथनरीतिः पात्राणां चरित्रचित्रणं च नाटकस्यास्य वैशिष्ट्यं द्योत्यते ।

**28-29 प्रश्नयोः एकस्य उत्तरं लिखत । अष्ट अङ्काः ।**

**28 മുതൽ 29 വരെയുള്ള ചോദ്യങ്ങളിൽ ഏതെങ്കിലും ഒരെണ്ണത്തിന് ഉത്തരം എഴുതുക. 8 സ്കോർ.** **(1 × 8 = 8)**

28. प्रदत्तेषु भवतः इष्टतमगीतं चित्वा आस्वादनटीकां लिखत ।

(1) त्यजति न पाणितलेन कपोलं
बालशशिनमिव सायमलोलम् ।।

(2) सरसमसृणमपि मलयजपङ्कं
पश्यति विषमिव वपुषि सशङ्कम् ।।

(3) स्तनविनिहितमपि हारमुदारम्
सा मनुते कृशतनुरिव भारम् ।।

29. अधः प्रदत्तां सूचनां पठित्वा श्रीनारायणगुरुदेवस्य भूतदयालुताम् अधिकृत्य एकम् उपन्यासं लिखत ।

**सूचना :**

- श्रीनारायणगुरुदेवः ।
- अरुविप्पुरं मठः ।
- कदलीफलगुञ्चस्यापहरणम् ।
- श्रीनारायणगुरोः उपदेशः चोरस्य मोचनं च ।